International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2025; 2(3): 66-68
© 2025 IJMH
www.themultijournal.com
Received: 21-06-2025
Accepted: 27-06-2025
Publish : 28-06-2025

**डॉ सोमकृष्ण**
अतिथि प्राध्यापक,
भारतीय पंथ मत संप्रदाय एवं सहमेटिक-धर्म अध्ययन केंद्र,(Hindu studies),
हिमाचल प्रदेश केंद्रीय विश्वविद्यालय, धर्मशाला

**Correspondence:**
**डॉ सोमकृष्ण**
अतिथि प्राध्यापक,
भारतीय पंथ मत संप्रदाय एवं सहमेटिक-धर्म अध्ययन केंद्र,(Hindu studies),
हिमाचल प्रदेश केंद्रीय विश्वविद्यालय, धर्मशाला

# उपनयनसंस्कारविमर्शः

**डॉ सोमकृष्ण**

संस्काराः मानवहिताय भवन्ति। संस्क्रियन्तेऽधिकारिणः सम्पाद्यन्त इति संस्काराः। अर्थात् संस्कारैः मानवाः परिष्कृताः भवन्ति। सामान्यात् विशिष्टतां गच्छन्ति। अतः कारणेनास्मत्पूर्वजैः संस्काराणां संकल्पना विहिता। ते च संस्काराः षोडश भवन्ति। गर्भाधान-पुंसवन-सीमन्तोन्नयन-जातकर्म-नामकरण-निष्क्रमण-अन्नप्राशन-चूडाकरण-कर्णवेध-उपनयन-सावित्रीश्रावण-वेदारम्भ-विवाह-अन्त्येष्टयः षोडश। तत्रोपनयनसंस्कारोऽन्यतमः विशिष्टश्च।

**उपनयनसंस्कारः**

उप अर्थात् समीपे नयनमित्युपनयनम्। अर्थात् यत्संस्कारात् पश्चात् जनः गुरोः समीपे नीयते सः संस्कार उपनयनमिति। उप इत्युपसर्गपूर्वकात् **णीञ् प्रापणे**[1] इति पाणिनीयाद्धातोः ल्युटि प्रत्यये उपनयनमिति निष्पद्यते।

चतुर्भिराश्रमैः षोडशसंस्कारैश्च मानवजीवनं व्यवस्थितमकार्यृषिभिः। ब्रह्मचर्य-गृहस्थ-वानप्रस्थ-सन्न्यासाः चत्वार आश्रमा भवन्ति। तत्र विवाहात् पूर्वं संस्काराः ब्रह्मचर्याश्रमे भवन्ति। तदुत्तरा अन्येष्वाश्रमेषु। तत्रेदं ध्येयं यदुपनयनात् पूर्वं संस्काराः सामान्यतया भवन्ति किन्तु उपनयन-संस्कारोऽतीव महत्त्वपूर्णः। तदुत्तरं जनः व्रते बद्धो भवति। **व्रतबन्ध** इत्यपरं नामास्य संस्कारस्य। काठकस्य टीकाकारेणादित्यदर्शनेन कथितमस्ति यत् उपायनम्, उपनयनम्, मौञ्जीबन्धनम्, वटुकरणम् इत्यादीन्यपि नामानि सन्ति। अर्थात् मानवेनागामिजीवनस्य कृते सज्जतायै व्रतबद्धो भूत्वा परिश्रमो विधीयतेऽत्र।

उपनयनशब्दस्यार्थद्वयं सम्पद्यते- बालकस्याचार्यस्य समीपे नयनं तथा ते संस्काराः कृत्यानि च यैः बालक आचार्यसमीपे नीयते।[2] आपस्तम्बधर्मसूत्रानुसारं उपनयनमेकमेवं संस्कारोऽस्ति विद्याग्रहणं गायत्रीमन्त्रप्राप्तेः पश्चात् क्रियते।[3] स्पष्टमस्ति यत् उपनयनं मुख्यतया गायत्री-उपदेशोऽस्ति। जैमिनिरपीदमेव तथ्यं स्वीकरोति।[4] अथर्ववेदे उपनयनशब्दस्य प्रयोगः ब्रह्मचारिणे ब्रह्मविद्यायाः शिक्षायै कृतोऽस्ति।

**आचार्य उपनयमानो ब्रह्मचारिणं कृणुते गर्भमन्तः।**
**तं रात्रीस्तिस्र उदरे बिभर्ति तं जात द्रष्टुमभिसंयन्ति देवाः।।** [5]

विद्याध्ययनायेच्छुकस्य जनस्य वैदिकसंस्कारः उपनयनमिति कथ्यते।[6] येन धार्मिकविधिना ब्रह्मचारी गुरु-वेद-नियम-व्रत-देवतादीनां सामीप्यदृष्ट्या दीक्षितः क्रियते स उपनयनमिति कथ्यते।[7] माता, पिता, संरक्षकाः एभिः बालकस्याचार्यसमीपे नयनम्, बालकस्याचार्याय समर्पणम्, आचार्येण बालकस्य पुत्रवत् ग्रहणमुपनयनमिति कथ्यते। कथितञ्च-

**तत्र यद् ब्रह्मजन्मास्य मौञ्जीबन्धनचिह्नितम्।**
**तत्रास्य माता सावित्री पिता त्वाचार्य इष्यते।।**[8]

बहुषूपनिषत्स्वस्य चर्चा कृतास्ति। ब्रह्मचारिणा समित्पाणिना गुरोः समीपं गन्तव्यम्। तत्र ब्रह्मचारी कथयति यदहं भवतः समीपे भविष्यामि इति पुन आचार्यः स्वीकरोति।9 वेदाध्यनायाचार्यस्य समीपे नयनं बालकस्य इत्येव वेदोक्तिरिति याज्ञवल्क्यस्मृतौ कथितम्।[10]

यद्यपि जन आबालादेव ब्रह्मचारी भवति किन्तु ब्रह्मचर्यस्य कठोरनियमा इतः प्रारभन्ते। कथितञ्चास्ति-

**जन्मना जायते शूद्रः संस्काराद्विज उच्यते।।**

अर्थात् द्विजानां द्विधा जन्म भवति। एकं मातुः द्वितीयं संस्कारात्। अतः ब्राह्मणक्षत्रियविशः द्विजाः कथ्यन्ते।

**उपनयनोद्देश्यम्**

शिक्षैवास्य संस्कारस्य प्रमुखं प्रयोजनम्। केवलं छात्राणां गुरोः समीपे नयनेनैवायं संस्कारः सम्पन्नो न भवति किन्तु सशाख-वेदस्याध्ययनात् पश्चात् पुनः पुनरस्यानुष्ठानेन भवति। उपनयनस्य प्रमुखमुद्देश्यं वेदानामध्ययनमेवास्ति। कथितञ्च-

**उपनीय गुरुः शिष्यं महाव्याहृतिपूर्वकम्।**

**वेदमध्यापयेदेनं शौचाचाराश्च शिक्षयेत्।।**[11]

विद्याप्राप्तिरेवोपनयनस्योद्देश्यमिति भारद्वाजः। विद्येच्छुकस्य जनस्य श्रुत्यनुसारं संस्कार उपनयनमिति कथ्यत इति। **उपनयनं विद्यार्थस्य श्रुतितः संस्कार इति।।**[12]

**उपनयनकालः**

उपनयनकालस्य विषये शास्त्राणि कथयन्ति-

**अष्टवर्षं ब्राह्मणमुपनयीत, एकादशवर्षं राजन्यं, द्वादशवर्षं वैश्यमिति।**[13] अर्थात् ब्राह्मणस्य अष्टमे वर्षे क्षत्रियस्यैकादशे, वैश्यस्य द्वादशे वर्षे उपनयनसंस्कराः स्यात्। यद्यप्युपनयनस्य कालनिर्धारणे शास्त्रेषु भिन्नभिन्नमतानि प्राप्यन्ते, तथापि ग्रन्थेषु प्राप्तप्रमाणै-रुपनयनकालः ब्राह्मणक्षत्रियवैश्यानां क्रमशः अष्ट, एकादश, द्वादश वर्षाः कथिताः। प्रायश्चित्तादिकर्माणि कृत्वा विशिष्टकामनया उपनयनसंस्कारस्य विधानमपि शास्त्रेषु कृतमस्ति। ब्रह्मचर्यस्य कामनया सप्तमे वर्षे, दीर्घायुषः कामनया अष्टमे वर्षे, ऐश्वर्यकामनया नवमे वर्षे, भोजनकामनया दशमे वर्षे, पशुधनस्य कामनया पञ्चदशे वर्षे, गुणसम्पन्नतायै च षोडशे वर्षे उपनयनस्य विधानं कृतमस्ति।

मनुस्मृतिकारेण वर्णादिक्रमेणोपनयनस्य कालः पञ्चमः, षष्ठः, दशमश्च वर्षाः कथिताः। याज्ञवल्क्यस्मृतौ गर्भात् जन्मनो वाष्टमे वर्षे ब्राह्मणस्य, क्षत्रियस्यैकादशे तथा वैश्यस्य स्वकुलपरम्परानुसारं कथितः कालः।

**ज्योतिषगणनानुसारं शुभकालाः**

अयनम्- उत्तरायणम्।

ऋतुः- वर्णादिक्रमेण वसन्तग्रीष्मशरदः।

मासः- माघमासात् आषाढं यावत्।

गर्गाचार्यस्यानुसारं जन्ममासे न कर्तव्य उपनयनसंस्कारः। कथितञ्च-

**विवाहे मेखलाबन्धे जन्ममासं विवर्जयेत्।**

**विशेषाज्जन्मपक्षं च वशिष्ठाद्यैरुदाहृतम्।।**[14]

तिथिः- शुक्लपक्षस्य 2,3,5,6,7,17 तिथयः।

वासराः- रविः, गुरुः, शुक्रः।

नक्षत्राणि- अश्विनी, रोहिणी, मृगशिरा, पुनर्वसुः, पुष्यः, उत्तराफाल्गुनी, हस्तः, चित्रा, स्वाती, अनुराधा, उत्तराषाढा, श्रवणः, धनिष्ठा, उत्तराभाद्रपदः, रेवतीत्येतानि नक्षत्राणि।

**उपनयनविधिः**

चूडाकरण-अक्षरारम्भसंस्काराभ्यां पश्चादयं संस्कारो विधीयते। उपनयनार्थं चूडाकरणमावश्यकं भवति। चूडाकरणमर्थात् केशमु-ण्डनम्। पिता कर्ता भूत्वा गौरी-गणेश-दीप-कलश-नवग्रहवास्तु-पूजनपूर्वकं अग्निस्थापनाविधिं सम्पादयति। तदनु ऋषिपूजनं सम्पादयति। तदनु ब्राह्मणानां बालानां च भोजनं सम्पाद्य गुरोः सन्निधावानयनम्। गुरुः बटुं वस्त्राणि धापयति। मेखलाबन्धनं करोति। दण्डं प्रयच्छति बटवे। तत्र पुन आचार्यः ब्राह्मणाय गायत्रीछन्दोनिबद्धं मन्त्रं प्रददाति। क्षत्रियाय त्रिष्टुब्छन्दोनिबद्धं मन्त्रं ददाति। वैश्याय जगतीछन्दोनिबद्धं मन्त्रं ददाति। कथितञ्चास्ति-**सद्यस्त्वेव गायत्रीं ब्राह्मणायाऽनुब्रूयादाग्नेयो वै ब्राह्मण इति श्रुतेः।**[15]

**त्रिष्टुभं राजन्यस्य। जगतीं वैश्यस्य। सर्वेषां वा गायत्रीम्।।**[16] सर्वेभ्यः गायत्रीनिबद्धं मन्त्रमपि दातुं शक्यते। पश्चात् ब्रह्मचारिणा भिक्षाचरणं कर्तव्यं गृह एव। भिक्षासमये ब्राह्मणः **भवान् भवती वा भिक्षां देहि,** क्षत्रियः **भिक्षां भवान् भवती वा देहि,** वैश्यः **भिक्षां देहि भवान् भवती** वा इत्यानुपूर्विकं वाक्यं प्रयुञ्ज्यात्।

गुरोः समीपं गत्वा ब्रह्मचारी प्रतिदिनं समिदाधानं, भिक्षाचरणम्, गुरुशुश्रूषा, मधुमांसभक्षणत्यागः, मिथ्यावाणीत्यागः, परिग्रहत्याग इत्येतानि कर्तव्यानि। **मधुमांसमज्जनोपर्यासनस्त्रीगमनानृतादत्ता-दानानि वर्जयेत्।।**[17]

**यज्ञोपवीतम्-**

पदमिदं द्वयोः पदयोः संयुक्तं रूपम्। यज्ञः उपवीतम् इत्येतौ। यज्ञोऽर्थात् यजनम्। उपवीतमर्थात् पवित्रं सूत्रम्। कस्यापि देवविशेषस्य पूजनम्, अर्चनम्, वन्दनम्, यजनादिकम् इत्यादि-क्रियाणां सम्पादनाय यत् प्रतिज्ञासूत्रं ध्रियते तत् यज्ञोपवीतमिति कथ्यते।

**उपनयनाधिकारिविचारः**

संस्कारोऽयं द्विजानां कृत एवास्ति। ब्राह्मण-क्षत्रिय-विश एवास्याधिकारिणः कथिताः। कथितञ्च-

**अष्टवर्षं ब्राह्मणमुपनयेत् गर्भाष्टमे वा। एकादशवर्षं राजन्यम्। द्वादशवर्षं वैश्यम्।**[18] एषु सूत्रेषु निर्दिष्टा एवाधिकारिण उपनयन-संस्कारस्य। अन्ये नाधिकारिणः। एतद्वर्णीया स्त्रियोऽपि नाधिका-रिण्यः। स्त्रीणामन्ये संस्कारा अमन्त्रकाः कार्याः विवाह एव वैदिको भवतीति शास्त्रवचनम्- **वैवाहिको विधिः स्त्रीणां संस्कारो वैदिकः स्मृतः।।**[19]

**शोधसारांशः**

अथर्ववेद उपनयनं द्वितीयं जन्म कथ्यते। **आचार्य उपनयमानो ब्रह्मचारिणं कृणुते गर्भमन्तः। तं रात्रीस्तिस्र उदर् बिभर्ति तं जातं द्रष्टुमभिसंयन्ति देवाः।।**[20] इति। वैदिकयुगे द्वितीयजन्मनः धार्मिकं महत्वमासीत्।

अध्ययनं सर्वेषां जीवनस्य प्रमुखं कर्म भवति। अध्ययने न कश्चन प्रमादः कर्तव्यः। कथितश्च- **ब्राह्मणेन निष्कारणो षडङ्गो वेदोऽध्येयो ज्ञेयश्च** इति। प्रयोजनं विनापि ब्राह्मणेन वेदा अवश्यं ज्ञातव्याः

वेदाध्ययनं प्रमादरहितं सफलं च स्यादित्येतदर्थं गुरोः समीपे गम्यते। गृहसङ्गात् दूरं भूयते। येन पूर्णरूपेण ब्रह्मचारी दत्तचित्तस्सन् अध्ययनं कुर्यात्। जीवनस्य, आत्मपरमात्मनोः, अध्यात्मनश्च यथार्थं ज्ञानं करोति गुरुकुले। एतत् ज्ञानस्य प्राप्त्यै ब्रह्मचारिणा नियमबद्धेन भाव्यम्। अतः शास्त्रोक्तान् नियमान् परिपालयन्, गुरुशुश्रूषां कुर्वन् वेदान् जानीयात्। कथितश्च मनुना-

**वेदानधीत्य वेदौ वा वेदं वापि यथाक्रमम्।**
**अविप्लुतब्रह्मचर्यो गृहस्थाश्रममावसेत्।।**[21]

द्वादशवर्षं गुरुकुले वासः इति नियमो वर्तते। तत्र चत्वारः चत्वारः वर्षाः प्रत्येकं वेदाय। प्राक् त्रय एव वेदा आसन् अतः हेतोः। एवम्प्रकारेण जनः गुरोः नियमपूर्वकं विद्यां गृहीत्वागामिजीवनाय सज्जो भूत्वा गुरवे दक्षिणां निवेद्याज्ञां प्राप्य समावर्तनं सम्पाद्य गृहं प्रत्यावर्तते। तदनु गृहस्थाश्रमं प्रविशति।

एवम्प्रकारीयाद्भुतो विधिरस्माकं शास्त्रेषु वर्तते येषां परिपालनेन जनानां लोकस्य समाजस्य चोपकृतिः भविष्यति। अतः सर्वैरपि शास्त्रवचनान्यवश्यमेव पालनीयानि।।

**कूटाङ्काः-**

उपनयनम्, यज्ञोपवीतम्, वेदाध्ययनम्, व्रतबन्धः, उपनयनाधिकारी, भिक्षाटनम्।।

**सन्दर्भग्रन्थसूची**


1. पाणिनीयधातुपाठः(वैयाकरणसिद्धान्तकौमुदी), शर्मा, गोविन्दप्रसाद, चौखम्बा सुरभारती प्रकाशन, नई दिल्ली, 2011
2. आपस्तम्बधर्मसूत्रम्, पाण्डेय उमेशचन्द्रः, चौखम्बा संस्कृत संस्थान, वाराणसी, 2006
3. जैमिनीसूत्रम्, मिश्र, डॉ. सुरेशचन्द्र, रंजन पब्लिकेशन्स, दिल्ली, 2003
4. अथर्ववेदः, चौखम्बा सुरभारती प्रकाशन, वाराणसी
5. आपस्तम्बगृह्यसूत्रम्, शर्मा, दुर्गादत्त, वेंकटेश्वर सोम प्रेस, मुम्बई, 1942
6. संस्कारप्रकाशः, त्रिवेदी, डॉ. भवानीशंकर त्रिवेदी, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः, 2009
7. मनुस्मृतिः, शास्त्री, आचार्यजगदीशलाल, मोतीलाल बनारसीदास पब्लिसर्स, दिल्ली, 1983
8. छान्दोग्योपनिषद्, गीताप्रेस गोरखपुर, 2013
9. बृहदारण्यकोपनिषद्, गीताप्रेस गोरखपुर, 2013
10. याज्ञवल्क्यस्मृतिः, पाण्डेय डॉ. उमेशचन्द्र, चौखम्बा संस्कृत संस्थान, वाराणसी, वि.सं. 2050
11. गर्गसंहिता, अनुवादक- श्री रामाधरजी शुक्ल, गीताप्रेस गोरखपुर, 2015
12. पारस्करगृह्यसूत्रम्, त्रिपाठी, डॉ.ब्रह्मानन्द, चौखम्बा सुरभारती प्रकाशन, वाराणसी, 2007


**संदर्भ :**

1 पाणिनीय, धातुपाठ

2 तत्रोपयनयशब्दः कर्मनामधेयम्।------- तच्च यौगिकमुदभिदन्यायात्।.......... तत्र च भावव्युत्पत्तिरेव साधीयसीति गम्यते। श्रौतार्थसम्भवात्।– संस्कारप्रकाश, पृ. 334

3 आपस्तम्बधर्मसूत्रम् 1.1.1.19

4 जैमिनीसूत्रम्, 6.1.35

5 अथर्ववेदः 11.5.3

6 **तत्र च येनाचार्यकुलमुपनीयते कुमारस्तदुपनयनं नाम कर्म श्रौतः पुरुषसंस्कारः। उपनयनं विद्यार्थस्य श्रुतितः संस्कार इति।** आपस्तम्बगृह्यसूत्रम्।

7 **उप समीपे आचार्यादीनां वटोर्नीतिर्नयनं प्राषणमुपनयनम्।** वीरमित्रोदयः, संस्कारप्रकाशः, पृ.334

8 मनुस्मृतिः 2.170

9 **ते ह समित्पाणयः पूर्वाह्णे प्रतिचक्रमिरे तान्हानुपनये दैतदुवाच।** छान्दोग्योपनिषद् 5.2.7
**उपैम्यहं भवन्तमिति वाचा ह स्मैव पूर्व उपयन्ति स होपायनकीर्त्योवास।** बृहदारण्यकोपनिषद् 6.2.7

10 **वेदाध्ययनायाचार्यसमीपे नयनमुपयनं तदेवोपायनमित्युक्त छन्दोऽनुरोधात्। तदर्थं वा कर्म।** विश्वरूपः, याज्ञवल्क्यस्मृतिः 1.14

11 याज्ञवल्क्यस्मृतिः 1.15

12 आपस्तम्बधर्मसूत्रम्।

13 वशिष्ठस्मृतिः 11.44

14 गर्गसंहिता, 17 अध्यायः

15 पारस्करगृह्यसूत्रम् 2.3.7

16 पारस्करगृह्यसूत्रम् 2.3.8-10

17 पारस्करगृह्यसूत्रम् 2.5.12

18 पारस्करगृह्यसूत्रम्, 2.2.1-3

19 मनुस्मृतिः 2.67

20 अथर्ववेदः 11.5.3

21 मनुस्मृतिः 3.2